MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

# A Philosophical Inquiry into the Questions of *Ātman* and *Brahman* in the Light of *Triśikhibrāhmaṇopaniṣad*

## त्रिशिखिब्राह्मणोपनिषद्दिशा आत्मब्रह्मविषयकप्रश्नानां दार्शनिकविमर्शः

***Soumyajit Acharyya***
*Assistant Teacher, Vivekananda Kendra Vidyalaya,*
*Arunachal Pradesh, India.*
*ORCID: 0009-0007-8831-9524*
*Email: soumyajitmon20@gmail.com*
*Page No: 80-85*

***Abstract:*** *The subject of the present article is "त्रिशिखिब्राह्मणोपनिषद्दिशा आत्मब्रह्मविषयकप्रश्नानां दार्शनिकविमर्शः". In this article, a philosophical discussion has been made of the concepts of body, Prāṇa, cause, Ātman, and Brahman, as expounded in the Triśikhi Brāhmaṇa Upaniṣad. In particular, the philosophical significance of the questions "किं देहः? किं प्राणः? किं कारणम्? किमात्मा?" (Triśikhi Brāhmaṇa Upaniṣad) has been elucidated.*

*The importance of the Ātman, the relationship between Ātman and Brahman, and the role of Yoga-sādhanā have also been discussed. Ultimately, the knowledge of Ātman and Brahman presented in this Upaniṣad is an important means for overcoming human ignorance, attaining Ātma-jñāna (Self-realization), and achieving Mokṣa (liberation).*

***Keywords:*** *Triśikhibrāhmaṇopaniṣad, Ātman, Brahman, Prāṇa, Self-Realization.*

### प्राक्कथनम्

भारतीयज्ञानपरम्परायाम् उपनिषदां स्थानम् अत्यन्तं महत्त्वपूर्णम् अस्ति। वेदस्य ज्ञानकाण्डरूपेण प्रसिद्धाः उपनिषदः मानवजीवनस्य परमसत्यस्य अनुसन्धानं कुर्वन्ति। उपनिषदां प्रमुखविषयाः आत्मा, ब्रह्म, जीवः, जगत्, माया, बन्धनं, मोक्षः तथा साधनमार्गः च इत्यादयः सन्ति। मनुष्यस्य वास्तविकं स्वरूपं किम्?, जगतः मूलकारणं किम्?, शरीरस्य जीवनस्य च आधारः कः?, परमसत्यं किम्? इत्यादीनां गम्भीराणां प्रश्नानां समाधानम् उपनिषद्सु दृश्यते।

उपनिषदां दार्शनिकचिन्तनस्य केन्द्रबिन्दुः आत्मा तथा ब्रह्म इति। आत्मा कः, ब्रह्म किम्, जीवस्य ब्रह्मणा सह कः सम्बन्धः इत्यादीनां विषयाणां विस्तृतं विवेचनम् उपनिषद्सु प्राप्यते। भारतीयदर्शनपरम्परायाम् आत्मज्ञानं मानवजीवनस्य परमं साध्यम् इति स्वीक्रियते। अतः उपनिषदः मनुष्यं बाह्यविषयेषु आसक्तजीवनात् निवर्त्य स्वस्य वास्तविकस्वरूपस्य अनुसन्धानं प्रति प्रेरयन्ति।

एतादृशीषु उपनिषत्सु त्रिशिखिब्राह्मणोपनिषद् अपि महत्त्वपूर्णा उपनिषद् अस्ति। अस्याम् उपनिषदि ब्रह्म, आत्मा, देहः, प्राणः, कारणम् इत्यादीनां दार्शनिकतत्त्वानां विचारः प्राप्यते। विशेषतः आत्मब्रह्मविषयकाः प्रश्नाः अस्याः उपनिषदः महत्त्वं प्रदर्शयन्ति।

### त्रिशिखिब्राह्मणोपनिषदः परिचयः

त्रिशिखिब्राह्मणोपनिषद् कृष्णयजुर्वेदसम्बद्धा उपनिषद् अस्ति। अस्याम् उपनिषदि ब्रह्मविद्या, आत्मविद्या तथा योगसाधनाविषयकानां तत्त्वानां च प्रतिपादनं दृश्यते। अत्र ब्रह्मप्राप्तेः उपायभूतानां योगसाधनानाम् अपि महत्त्वं प्रदर्शितम् अस्ति।

अस्याः उपनिषदः आरम्भः अत्यन्तः रोचकः तथा दार्शनिकदृष्ट्या महत्त्वपूर्णः अस्ति। अत्र त्रिशिखिब्राह्मणः नामकः जिज्ञासुः ब्राह्मणः आत्मतत्त्वं ज्ञातुम् इच्छति। सः परमज्ञानस्य प्राप्त्यर्थम् आदित्यस्य समीपं गच्छति। तत्र सः आदित्यं भगवन्तं

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

प्रति आत्मब्रह्मविषयकान् प्रश्नान् पृच्छति।

उपनिषत्सु प्रश्नोत्तरपरम्परायाः विशेषं महत्त्वम् अस्ति। ज्ञानस्य प्रारम्भः जिज्ञासया भवति। यदा मनुष्यस्य अन्तःकरणे गम्भीराः प्रश्नाः उत्पद्यन्ते, तदा सः सत्यस्य अनुसन्धानं कर्तुम् आरभते। "अहं कः?", "इदं शरीरं किम्?", "प्राणस्य स्वरूपं किम्?", "जगतः कारणं किम्?", "आत्मा कः?" इत्यादयः प्रश्नाः मानवस्य आध्यात्मिकजीवनस्य मूलाधाराः भवन्ति। अतः त्रिशिखिब्राह्मणोपनिषद् केवलं दार्शनिकग्रन्थः न, अपि तु आत्मान्वेषणस्य मार्गदर्शिका अपि अस्ति।

**आत्मब्रह्मविषयकप्रश्नाः**

त्रिशिखिब्राह्मणोपनिषदि आत्मब्रह्मविषयकप्रश्नानां विशेषं महत्त्वं दृश्यते। उपनिषदां सम्पूर्णे वाङ्मये आत्मनः ब्रह्मणश्च अनुसन्धानं प्रधानविषयः अस्ति। उपनिषदः सामान्यरूपेण बाह्यजगतः वर्णनं कर्तुं न प्रवर्तन्ते। ताः बाह्यजगतः परं गत्वा जीवनस्य मूलतत्त्वस्य अनुसन्धानं कुर्वन्ति। मनुष्याः सामान्यः शरीरं, धनं, परिवारं, समाजं तथा भौतिकसंसारं जीवनस्य मुख्यं सत्यं चिन्तयन्ति। किन्तु उपनिषदः पृच्छन्ति—एतेषां सर्वेषां पृष्ठे स्थितं मूलतत्त्वं किम् अस्ति? मनुष्यस्य शरीरं परिवर्तते, प्राणः प्रवर्तते, मनः निरन्तरं सङ्कल्पविकल्पं करोति, बुद्धिः निर्णयं करोति। परन्तु एतेषां सर्वेषां परिवर्तनानां साक्षी कः? एषः प्रश्नः आत्मविद्यायाः मूलः प्रश्नः अस्ति।अतः आत्मब्रह्मविषयकप्रश्नानां माध्यमेन उपनिषदः साधकं बाह्यात् आन्तरिकं प्रति, स्थूलात् सूक्ष्मं प्रति, असत्यात् सत्यं प्रति तथा अज्ञानात् ज्ञानं प्रति नयति।

**त्रिशिखिब्राह्मणस्य आदित्यलोकगमनम्**

त्रिशिखिब्राह्मणः आत्मतत्त्वस्य ज्ञानं प्राप्तुम् इच्छन् आदित्यलोकं जगाम। सः आदित्यस्य समीपं गत्वा ब्रह्मविद्यां प्राप्तुम् इच्छति। अत्र आदित्यस्य महत्त्वं विशेषरूपेण विचारणीयम् । सूर्यः बाह्यजगतः प्रकाशकः अस्ति। सूर्यस्य प्रकाशेन अन्धकारस्य नाशः भवति तथा सर्वाणि वस्तूनि दृश्यन्ते। तथैव ज्ञानरूपी प्रकाशः अज्ञानरूपी अन्धकारं नाशयति।

अतः आदित्यः ज्ञानस्य तथा प्रकाशस्य प्रतीकरूपेण अपि स्वीक्रियते। त्रिशिखिब्राह्मणस्य आदित्यलोकगमनम् वस्तुतः अज्ञानरूपान्धकारात् ज्ञानरूपप्रकाशं प्रति गमनस्य प्रतीकम् इति वक्तुं शक्यते। साधकः यदा सांसारिकविषयेषु वास्तविकां शान्तिं न प्राप्नोति, तदा तस्य अन्तःकरणे आत्मज्ञानस्य जिज्ञासा उत्पद्यते। एषा जिज्ञासा एव तं ज्ञानस्य दिशि प्रेरयति। त्रिशिखिब्राह्मणः अपि तादृशः जिज्ञासुः आसीत्। सः सत्यं ज्ञातुम् इच्छन् आदित्यस्य समीपं जगाम।

**त्रिशिखिब्राह्मणस्य प्रश्नाः**

त्रिशिखिब्राह्मणः आदित्यं प्रति प्रश्नान् पृच्छति— "किं देहः? किं प्राणः? किं कारणम्? किमात्मा?" (त्रिशिखिब्राह्मणोपनिषद् ) एते प्रश्नाः साधारणाः प्रश्नाः न सन्ति। अस्मिन् प्रश्नचतुष्टये सम्पूर्णस्य मानवजीवनस्य दार्शनिकसमस्या निहिता अस्ति। अनेन ज्ञायते यत् त्रिशिखिब्राह्मणः केवलं बाह्यजगतः ज्ञानं न इच्छति, अपि तु सृष्टेः, जीवनस्य तथा आत्मनः च मूलतत्त्वं ज्ञातुम् इच्छति।

**प्रथमः प्रश्नः—"किं देहः?"-देहस्य स्वरूपम्**

किं देहः? अर्थात् देहस्य वास्तविकं स्वरूपं किम्? मनुष्यः सामान्यतः शरीरमेव स्वस्य स्वरूपं मन्यते। सः वदति—"अहं युवा अस्मि", "अहं वृद्धः अस्मि", "अहं स्थूलः अस्मि", "अहं रोगी अस्मि" इत्यादयः। एतेषु वाक्येषु शरीरस्य धर्मः, आत्मनि आरोपितः भवति। परन्तु उपनिषदः पृच्छति—किं शरीरमेव आत्मा? एतस्य उत्तरत्वेन वक्तुं शक्यते यत्- शरीरं जन्म प्राप्नोति, वर्धते, परिवर्तते तथा अन्ते विनश्यति। बाल्यं, कौमारं, यौवनं तथा वार्धक्यम् इत्यादयः शरीरस्य विभिन्नाः अवस्थाः सन्ति। शरीरस्य सर्वं रूपं कालानुसारं परिवर्तते। परन्तु एतेषां परिवर्तनानाम् अनुभवकर्ता कः? मनुष्यः स्वस्य बाल्यकालं स्मरति। सः अनुभवति—"अहं बाल्ये यः आसम्, स एव अहम् अद्य अस्मि।" अत्र शरीरं परिवर्तितम्, किन्तु "अहम्" इति अनुभूयमानं तत्त्वं निरन्तरं वर्तमानम् अस्ति।

अतः शरीरं आत्मा नास्ति। शरीरं आत्मनः एकम् उपकरणम् इति वक्तुं शक्यते। यथा मनुष्यः वस्त्रं धारयति तथा वस्त्रं परिवर्तयति, तथैव शरीरम् अपि परिवर्तनशीलम् अस्ति। एतदेव तत्त्वं श्रीमद्भगवद्गीतायाम् अपि भगवता श्रीकृष्णेन

प्रतिपादितम्—

"वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही॥" (गीता २.२२)

अर्थात् यथा मनुष्यः जीर्णानि वस्त्राणि परित्यज्य नूतनानि वस्त्राणि धारयति, तथैव देही जीर्णानि शरीराणि विहाय नूतनानि शरीराणि गृह्णाति। अतः शरीरं नश्वरं परिवर्तनशीलं च अस्ति, किन्तु शरीरस्य धारकः आत्मा नित्यः इति अनेन स्पष्टं भवति। देहस्य सम्बन्धः स्थूलजगता सह अस्ति। इन्द्रियाणां माध्यमेन मनुष्यः बाह्यविषयान् अनुभवति। परन्तु शरीरस्य चेष्टानां साक्षी आत्मा अस्ति। अतः देहविषयकविचारः अन्ततः आत्मतत्त्वस्य दिशि साधकं नयति।

**द्वितीयः प्रश्नः—"किं प्राणः?"-प्राणस्य स्वरूपम्**

किं प्राणः? अर्थात् जीवनशक्तिरूपस्य प्राणस्य स्वरूपं किम्? एतस्य उत्तरत्वेन वक्तुं शक्यते यत्- प्राणः जीवनस्य महत्त्वपूर्णः आधारः अस्ति। प्राणस्य उपस्थित्या शरीरं सजीवं भवति। प्राणस्य निर्गमनेन शरीरं निष्प्राणं भवति। श्वासप्रश्वासः, शरीरस्य गतिः, विभिन्नाः जैविकक्रियाः तथा जीवनधारणं च इत्यादिषु प्राणस्य महत्त्वं दृश्यते। अतः प्राणः इति मानवजीवनस्य अनिवार्यं तत्त्वम् अस्ति। प्रश्नोपनिषदि प्राणस्य महत्त्वं वर्णयन् ऋषिः वदति—

"यथा सम्राडेवाधिकृतान् विनियुङ्क्ते । एतान् ग्रामान् एतान् ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान् प्राणान् पृथक् पृथगेव सन्निधत्ते"॥ (प्रश्नोपनिषद् ३.४)

अस्य मन्त्रस्य अभिप्रायः अयम् यत् यथा सम्राट् स्वाधीनान् अधिकारिणः विभिन्नेषु कार्येषु नियुक्तवान्, तथैव मुख्यप्राणः अपि इतरान् प्राणान् पृथक् पृथक् स्वस्वकार्येषु विनियुङ्क्ते। किन्तु उपनिषदां दृष्ट्या प्राणः अपि आत्मा नास्ति। यतः प्राणः कार्यशीलः अस्ति, किन्तु तस्य क्रियाणाम् अपि कश्चित् साक्षी अस्ति। मानवः शरीरं नास्ति इति विचारात् परं गत्वा प्राणस्य विषये चिन्तनं करोति। ततः सः ज्ञातुं प्रयतते यत् प्राणात् अपि किञ्चित् परं तत्त्वम् अस्ति। आत्मा प्राणस्य आधाररूपेण चिन्त्यते। अस्मिन् प्रसङ्गे कठोपनिषदि अपि प्रतिपादितम् अस्ति—

"इन्द्रियेभ्यः परा ह्यर्था
अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिः
बुद्धेरात्मा महान्परः॥ "(कठोपनिषद् १.३.१०)

अस्य मन्त्रस्य तात्पर्यम् अस्ति यत् इन्द्रियेभ्यः विषयाः श्रेष्ठाः, विषयेभ्यः मनः श्रेष्ठम्, मनसः बुद्धिः श्रेष्ठा तथा बुद्धेः परं महान् आत्मा अस्ति। अनेन ज्ञायते यत् साधकः क्रमशः इन्द्रियविषयेभ्यः मनसि, मनसः बुद्धौ तथा अन्ततः आत्मतत्त्वे उन्नीयते। अतः साधकस्य यात्रा देहात् प्राणं प्रति, प्राणात् मनः प्रति तथा मनसः परं आत्मतत्त्वं प्रति भवति।

प्राणः जीवनशक्तिः अस्ति, किन्तु आत्मा चेतनस्वरूपः अस्ति। प्राणस्य उपस्थित्या शरीरं कार्यं करोति, किन्तु आत्मप्रकाशेन एव प्राणादीनां ज्ञानं भवति।

**तृतीयः प्रश्नः—"किं कारणम्?"**

किं कारणम्? अर्थात् जगतः, शरीरस्य तथा सम्पूर्णसृष्टेः मूलकारणं किम्? एतस्य उत्तरत्वेन वक्तुं शक्यते यत्- भारतीयदर्शनपरम्परायां कारणविचारस्य विशेषं महत्त्वम् अस्ति। यत् किमपि कार्यं दृश्यते, तस्य किञ्चित् कारणं भवति।उदाहरणरूपेण घटः कार्यम् अस्ति तथा मृत्तिका तस्य कारणम् अस्ति। सुवर्णनिर्मितम् आभूषणं कार्यम् अस्ति तथा सुवर्णं तस्य कारणम् अस्ति। बीजं वृक्षस्य कारणं भवति। तथैव प्रश्नः उत्पद्यते—इदं जगत् कार्यरूपम् अस्ति चेत् अस्य कारणं किम्? अस्य जगतः उत्पत्तिः कुतः अभवत्? केन इदं जगत् धार्यते? अन्ते इदं जगत् कस्मिन् लीयते? एते प्रश्नाः कारणविचारस्य

अन्तर्गताः भवन्ति। अस्मिन् प्रसङ्गे तैत्तिरीयोपनिषदि अपि प्रतिपादितम् अस्ति—

"यतो वा इमानि भूतानि जायन्ते।
येन जातानि जीवन्ति।
यत्प्रयन्त्यभिसंविशन्ति।
तद्विजिज्ञासस्व। तद्ब्रह्मेति॥" (तैत्तिरीयोपनिषद् ३.१.१)

अस्य मन्त्रस्य तात्पर्यम् अस्ति यत् यतः सर्वाणि भूतानि उत्पद्यन्ते, येन सर्वाणि भूतानि जीवन्ति तथा अन्ते यस्मिन् एव लीयन्ते, तत् ब्रह्म इति ज्ञातव्यम्। अनेन स्पष्टं भवति यत् ब्रह्म एव जगतः उत्पत्तेः, स्थितेः तथा लयस्य परमकारणम् अस्ति।

उपनिषदां दृष्ट्या जगतः परमकारणं ब्रह्म अस्ति। ब्रह्म एव सर्वस्य मूलाधारः इति वेदान्तपरम्परायां प्रतिपाद्यते। अतः "किं कारणम्?" इति प्रश्नः केवलं सामान्यकारणस्य विषयं न प्रतिपादयति। अयं प्रश्नः साधकं परमकारणस्य अनुसन्धानं प्रति नयति।

जगतः विविधाः नामरूपपरिवर्तनानि दृश्यन्ते। परन्तु एतेषां सर्वेषां पृष्ठे स्थितं मूलतत्त्वं किम्? इति प्रश्नः उपनिषदां दार्शनिकचिन्तनस्य प्रमुखः विषयः अस्ति।

**चतुर्थः प्रश्नः— "किमात्मा?"-आत्मनः स्वरूपम्**

चतुर्थः प्रश्नः तथा सर्वाधिकमहत्त्वपूर्णः प्रश्नः अस्ति—"किमात्मा?" आत्मा कः? इति प्रश्नः सम्पूर्णस्य उपनिषद्वाङ्मयस्य मुख्यप्रश्नः अस्ति।

मनुष्यः स्वस्य परिचयं नाम्ना, शरीरेण, जात्या, देशेन, कर्मणा तथा विभिन्नैः बाह्यपरिचयैः करोति। परन्तु एते सर्वे परिचयाः परिवर्तनशीलाः सन्ति। नाम परिवर्तनं भवितुं शक्नोति। शरीरं परिवर्तते। कर्म परिवर्तनं भवति। सामाजिकपरिचयः अपि परिवर्तनशीलः अस्ति। परन्तु यः एतेषां सर्वेषां परिवर्तनानां साक्षी अस्ति, सः कः? स एव आत्मा इति उपनिषदां दृष्ट्या चिन्त्यते। आत्मा न शरीरम्, न प्राणः, न मनः, न बुद्धिः। आत्मा एतेषां सर्वेषां साक्षी अस्ति। अस्मिन् प्रसङ्गे कठोपनिषदि आत्मनः नित्यस्वरूपं प्रतिपादयता उक्तम् अस्ति—

"न जायते म्रियते वा विपश्चिन्
नायं कुतश्चिन्न बभूव कश्चित्।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे॥" (कठोपनिषद् १.२.१८)

अस्य मन्त्रस्य तात्पर्यम् अस्ति यत् आत्मा न जायते न म्रियते च। सः अजः, नित्यः, शाश्वतः तथा पुराणः अस्ति। शरीरस्य नाशेऽपि आत्मनः नाशः न भवति।

मनसि विविधाः विचाराः आगच्छन्ति तथा गच्छन्ति। कदाचित् सुखस्य विचारः भवति, कदाचित् दुःखस्य विचारः। बुद्धिः अपि विभिन्ननिर्णयान् करोति। किन्तु यः मनोवृत्तीनां ज्ञानं करोति, सः मनः न भवितुम् अर्हति। अतः आत्मा साक्षिरूपः अस्ति। आत्मनः साक्षिस्वरूपं बृहदारण्यकोपनिषदि अपि प्रतिपादितम् अस्ति—

"न वा अरे पत्युः कामाय पतिः प्रियो भवति,
आत्मनस्तु कामाय पतिः प्रियो भवति।" (बृहदारण्यकोपनिषद् २.४.५)

अस्य मन्त्रस्य तात्पर्यम् अस्ति यत् सर्वेषां प्रियत्वस्य मूलं आत्मा एव अस्ति। मनुष्यः वस्तुतः आत्मनः कारणेन एव सर्वं प्रियं मन्यते। अतः आत्मा मानवजीवनस्य सर्वान्तरतमं तथा महत्त्वपूर्णं तत्त्वम् अस्ति।

वेदान्तदृष्ट्या आत्मा नित्यः, शुद्धः, बुद्धः तथा मुक्तस्वरूपः अस्ति। आत्मा जन्ममरणरहितः इति चिन्त्यते। शरीरस्य जन्म तथा मरणं भवति, परन्तु आत्मा शरीरात् भिन्नः अस्ति। अस्मिन् प्रसङ्गे कठोपनिषदि आत्मनः सूक्ष्मं व्यापकं च स्वरूपं वर्णितम् अस्ति—

"अणोरणीयान् महतो महीयान्

आत्मास्य जन्तोर्निहितो गुहायाम्।
तमक्रतुः पश्यति वीतशोको
धातुप्रसादान्महिमानमात्मनः॥" (कठोपनिषद् १.२.२०)

अस्य मन्त्रस्य तात्पर्यम् अस्ति यत् आत्मा अणोः अपि अणीयान् तथा महतः अपि महीयान् अस्ति। सः प्रत्येकस्य प्राणिनः हृदयगुहायां स्थितः अस्ति। शुद्धान्तःकरणः साधकः आत्मज्ञानस्य माध्यमेन आत्मनः स्वरूपं ज्ञात्वा शोकरहितः भवति।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् आत्मा शरीरादिभ्यः भिन्नः, नित्यः, शाश्वतः तथा साक्षिस्वरूपः अस्ति। शरीरं, प्राणः, मनः तथा बुद्धिः परिवर्तनशीलानि सन्ति, किन्तु आत्मा एतेषां सर्वेषां साक्षिरूपेण नित्यं स्थितः अस्ति।

**प्रश्नोत्तरपरम्परायाः महत्त्वम्**

त्रिशिखिब्राह्मणोपनिषदि प्रश्नोत्तरपद्धत्या ज्ञानस्य प्रतिपादनं भारतीयगुरुशिष्यपरम्परायाः महत्त्वं प्रदर्शयति। भारतीयपरम्परायां शिष्यः प्रश्नं करोति तथा गुरुस्तस्य समाधानं करोति। प्रश्नस्य माध्यमेन शिष्यस्य जिज्ञासा प्रकटिता भवति। प्रश्नः नास्ति चेत् ज्ञानस्य आवश्यकता अपि स्पष्टतया न भवति। जिज्ञासा ज्ञानस्य प्रथमं सोपानम् अस्ति। त्रिशिखिब्राह्मणः आदित्यं प्रति प्रश्नं करोति। एषा घटना दर्शयति यत् सत्यज्ञानं प्राप्तुं जिज्ञासुः भवितव्यम् । ज्ञानप्राप्तेः क्रमः एवं दृश्यते—

जिज्ञासा → प्रश्नः → विचारः → ज्ञानम् → आत्मबोधः।

अतः त्रिशिखिब्राह्मणस्य प्रश्नाः केवलं दार्शनिकप्रश्नाः न, अपि तु आत्मबोधस्य प्रथमं सोपानम् इति वक्तुं शक्यते।

**कठोपनिषदा सह तुलनात्मकदृष्टिः**

त्रिशिखिब्राह्मणोपनिषदः आत्मब्रह्मविषयकप्रश्नानां विचारं कठोपनिषदा सह तुलनात्मकदृष्ट्या अपि अवलोकयितुं शक्यते।

कठोपनिषदि नचिकेता यमस्य समीपं गत्वा आत्मतत्त्वं ज्ञातुम् इच्छति। नचिकेता मृत्योः रहस्यं ज्ञातुं जिज्ञासां करोति। यमः तस्मै आत्मनः नित्यस्वरूपं तथा अमृतत्वं प्रतिपादयति। तथैव त्रिशिखिब्राह्मणोपनिषदि त्रिशिखिब्राह्मणः आदित्यस्य समीपं गत्वा देहस्य, प्राणस्य, कारणस्य तथा आत्मनः स्वरूपं पृच्छति।उभयत्रापि साधकः ज्ञानप्राप्त्यर्थं गुरुं प्रति गच्छति। उभयत्रापि प्रश्नः ज्ञानस्य मूलं भवति। नचिकेता मृत्योः रहस्यात् आत्मतत्त्वं प्रति गच्छति। त्रिशिखिब्राह्मणः देहप्राणकारणादिविचारात् आत्मतत्त्वं प्रति गच्छति। अतः उभयोरपि उपनिषदोरन्तिमं लक्ष्यं आत्मज्ञानमेव अस्ति।

**दार्शनिकमहत्त्वम्**

"किं देहः? किं प्राणः? किं कारणम्? किमात्मा?" (त्रिशिखिब्राह्मणोपनिषद्) इति प्रश्नचतुष्टयं सम्पूर्णस्य भारतीयदार्शनिकचिन्तनस्य साररूपम् इति वक्तुं शक्यते।

देहः स्थूलतत्त्वस्य प्रतिनिधिः अस्ति। प्राणः जीवनशक्तेः प्रतिनिधिः अस्ति। कारणम् जगतः मूलतत्त्वस्य प्रतिनिधिः अस्ति। आत्मा चेतनस्य परमस्वरूपस्य प्रतिनिधिः अस्ति। अतः एतेषां प्रश्नानां क्रमः अपि महत्त्वपूर्णः अस्ति।

देहात् → प्राणं प्रति → कारणं प्रति → आत्मानं प्रति।

एषः क्रमः स्थूलात् सूक्ष्मं प्रति साधकस्य यात्रां प्रदर्शयति। प्रथमः साधकः शरीरस्य विषये चिन्तयति। ततः जीवनशक्तिरूपस्य प्राणस्य विषये विचारं करोति। तदनन्तरं जगतः मूलकारणस्य अनुसन्धानं करोति। अन्ते सः स्वस्य वास्तविकस्वरूपम् अर्थात् आत्मानं ज्ञातुम् इच्छति।

**उपसंहारः**

एवं त्रिशिखिब्राह्मणोपनिषद् भारतीयज्ञानपरम्परायां अत्यन्तं महत्त्वपूर्णा उपनिषद् अस्ति। अस्याम् उपनिषदि आत्मा, ब्रह्म, देहः, प्राणः तथा कारणम् इत्यादीनां दार्शनिकतत्त्वानां विचारः प्राप्यते। त्रिशिखिब्राह्मणस्य आदित्यलोकगमनं ज्ञानस्य अन्वेषणस्य प्रतीकरूपेण द्रष्टुं शक्यते। सः आदित्यस्य समीपं गत्वा पृच्छति— "किं देहः? किं प्राणः? किं कारणम्? किमात्मा?" (त्रिशिखिब्राह्मणोपनिषद्) एते प्रश्नाः साधकस्य आध्यात्मिकयात्रायाः विभिन्नानि सोपानानि सन्ति।

देहस्य विचारात् प्राणस्य विचारः भवति। प्राणस्य विचारात् जगतः कारणस्य अनुसन्धानं भवति। कारणविचारात्

आत्मतत्त्वस्य जिज्ञासा उत्पद्यते। अन्ततः आत्मज्ञानं साधकस्य परमं लक्ष्यं भवति। त्रिशिखिब्राह्मणोपनिषदः महत्त्वपूर्णः सन्देशः अस्ति यत् मनुष्यः केवलः देहस्य तथा बाह्यजगतः स्तरपर्यन्तं सीमितः न भवेत्। तेन स्वस्य वास्तविकस्वरूपस्य अनुसन्धानं करणीयम्। आत्मज्ञानस्य प्राप्त्या अज्ञानस्य नाशः भवति तथा मनुष्यः शान्तिं, समत्वं तथा मोक्षमार्गं च प्राप्नोति।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत्—त्रिशिखिब्राह्मणोपनिषद् आत्मब्रह्मविषयकचिन्तनस्य एकं महत्त्वपूर्णं दार्शनिकग्रन्थम् अस्ति। देहात् आत्मपर्यन्तं, अज्ञानात् ज्ञानपर्यन्तं तथा बन्धनात् मोक्षपर्यन्तं मानवस्य यात्रायाः मार्गदर्शनम् अस्याः उपनिषदः प्रमुखं वैशिष्ट्यम् अस्ति।

## Bibliography


- त्रिशिखिब्राह्मणोपनिषद्, मुक्तिकोपनिषद्-संग्रहः।
- ईशाद्यष्टोत्तरशतोपनिषदः, सम्पादकः वासुदेव लक्ष्मण शास्त्री पणशीकर, निर्णयसागर प्रेस, मुम्बई।
- Aiyar, K. Narayanasvami (Translator), The Thirty Minor Upanishads, Madras, 1914.
- Deussen, Paul, The Sixty Upanishads of the Veda, translated by V. M. Bedekar and G. B. Palsule, Motilal Banarsidass, Delhi.
- ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर।
- बृहदारण्यकोपनिषद्, गीताप्रेस, गोरखपुर।
- तैत्तिरीयोपनिषद् , गीताप्रेस, गोरखपुर।